दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-8 ■ वर्ष-5 ■ अङ्क-329 | 1 | सितम्बर 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लसप्तमी
आश्विन् 02 प्रविष्टांशः मङ्गलमयः भवेत्

2 टाटासमूहस्य अध्यक्षपदे एन. चन्द्रशेखरनस्य पञ्चवर्षाय पुनर्नियुक्तिः

4 सितम्बरमासे रोहताङ्ग-प्रभृति-शिखरेषु हिमपातस्य शुभ्राच्छादनम्; त्रिहोराः यावत् स्थगिता मणिमहेशयात्रा

8 पटना-विश्वविद्यालयस्य केन्द्रीय-पुस्तकालयः अधुना रात्रौ दश-वादनपर्यन्तम् उद्घाटितः भविष्यति; विद्यार्थिनः प्राप्स्यन्ति होरा-द्वयस्य अतिरिक्तं समयम्

## प्रधानमन्त्रिणा मोदिना नवदेहल्यां 'सेमिकॉन-इण्डिया 2026' इति कार्यक्रमस्य उदघाटनं कृतम्



प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्याः यशोभूमि-परिसरे षड्विंशत्यधिक-द्विसहस्रतमस्य सेमिकॉन्-इण्डिया इत्याख्यस्य त्रिदिवसीय-सम्मेलनस्य उद्घाटनम् अकरोत्। त्रिदिवसीयं सम्मेलनमिदं भारते सहकारस्य, निवेशस्य, नवाचारस्य, प्रतिभा विकासस्य च संवर्धनाय केन्द्रितमस्ति। अत्रावसरे भाषमाणः प्रधानमन्त्री अवोचत् यत् भारतस्य अर्धचालक-पारिस्थितिकी-तन्त्रं तीव्रगत्या प्रसरति, यच्च नवाचाराय, निवेशाय, विकासाय च नूतनान् अवसरान् उद्घाटयति । श्रीमोदी न्यरूपयत् यत् एकत्र भारतस्य अर्थव्यवस्था सम्वर्धते, अपरत्र च भारतमालक्ष्य वैश्विक-विश्वासोऽपि दृढीभवति। तेन प्रतिपादितं यत् समाह्वानपूर्णायां वैश्विक परिस्थितौ अपि भारतेन सप्त-दशमलव-अष्ट-प्रतिशतन्मितः वृद्धि-मानाङ्कः पञ्जीकृतः। अस्मिन्नेव काले जापान-देशस्य ऋण-मूल्याङ्कन-संस्थया भारतस्य सार्वभौम ऋण-श्रेणी समुन्नयिता। प्रधानमन्त्री अवोचत् यत् देशस्य प्रत्येकं नागरिकः विकसित भारतस्य निर्माणाय सङ्कल्पबद्धतया कार्यं करोति ।
सेमिकण्डक्टर-क्षेत्रे 'चिप' प्रारूपणाय द्विशतनवोद्यमानां पोषणं विधीयते - अश्विनी-वैष्णवः। अवसरेऽस्मिन् केन्द्रीय-इलेक्ट्रॉनिक्स्-सूचना प्रौद्योगिकी-मन्त्री अश्विनी-वैष्णवः अवोचत् यत् क्षेत्रेऽस्मिन् आधारशिला स्थापिता अस्ति, अग्रे च सेमिकॉन्-2.0 इति योजनायाः माध्यमेन उद्योग-निर्माणं भविष्यति, या षट्सु प्रमुख-स्तम्भेषु आधारिता अस्ति। एतेषु स्तम्भेषु अर्धचालक-अभिकल्पना, यन्त्राणि, स्मृति-घटकाः, सिलिकॉन्-तत्वम्, मिश्रित-तार्किक-निर्माण-घटकाः, अनुसन्धान-विकासौ च अन्तर्भवन्ति । मन्त्रिणा विज्ञापितं यत् सर्वकारेण भारते अर्धचालक-आवश्यकतानां सम्पूर्ण-क्षेत्रे चिप्-अभिकल्पनायै न्यूनातिन्यूनं द्विशतं नूतन-उद्यमान् संस्थाश्च समुपकर्तुं लक्ष्यं निर्धारितम्। अवधेयं यत् भारतस्य अभिकल्पना-सामर्थ्यं विश्व-विश्रुतम् अस्ति, अतः सेमिकॉन्- 2.0 इति योजनायाः अन्तर्गतम् अर्धचालक-अभिकल्पना-संस्थानां संवर्धनमेव प्रमुखं लक्ष्यं भविष्यति।

## मोदिनः पञ्चविंशत्यधिक-लोकसेवा-व्रत-पूर्त्यवसरे भाजपेतिदलस्य मासात्मकं राष्ट्रव्यापी 'सेवा-सङ्कल्प-अभियानम्' समालब्धम्।

प्रधानमन्त्रिणः नरेन्द्रमोदिनः सतत सार्वजनिक-जीवनस्य लोकसेवा-व्रतस्य च पञ्चविंशति-वर्षीय-पूर्णताम् अवबुध्य भारतीय-जनता-दलस्य मासात्मकं देशव्यापी 'सेवा-सङ्कल्प-अभियानम्' गतदिवसात् अबाधित-प्रामाण्येन समालब्धम्। आगामि-मासस्य सप्तदश-दिनाङ्क यावत् आनुपूर्विक-क्रमेण प्रवर्तिष्यमाणस्य अस्य अभियानस्य प्रथमः दिवसः 'सेवा-दिवसः' इति सम्भाव्यते, यस्यान्तर्गतं देशस्य समस्त प्रान्तेषु रक्तदान शिविराणि आयोजितानि। नवदेहल्यां दल-मुख्यालये दलाध्यक्षेण नितिन-नबीनेन रक्तदान शिविरस्य उद्घाटनं विहितम्, यत्र तेन




सह अन्यैः वरिष्ठ-नेतृभिः कार्यकर्ताभिश्च स्वयम् अपि रक्तदानं सम्पादितम्। अपरञ्च देहल्यां मुख्यमन्त्रिण्या रेखा-गुप्तया खाटू श्याम-मन्दिरे प्रधानमन्त्रिणः दीर्घायुषे निरोगतायै च हवन-पूजनम् समनुष्ठितम्। वार्ताहरान् सम्बोधयन्त्या तया प्रोक्तं यत् मोदिनः सेवा-भावस्य प्रेरणा-बलेन देहली-सर्वकारेण अद्य बहुविधाः जन-कल्याणकारिणः सर्वकारीय-कार्यक्रमाः समायोजिताः।

## अद्यतनीयं सुभाषितम्

**शतं विहाय भोक्तव्यं,सहस्रं स्नानमाचरेत्।**
**लक्षं विहाय दातव्यं,कोटिं त्यक्त्वा हरिं भजेत्।।**

भावार्थः- सौ कार्य को छोड़कर भोजन करना चाहिए। हजारों कार्य को छोड़कर स्नान करना चाहिए। लाखों कार्य को छोड़कर दान देना चाहिए और करोड़ों कार्य को छोड़कर परमात्मा की स्तुति करनी चाहिए।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## राष्ट्रपतिः, उपराष्ट्रपतिः च प्रधानमन्त्रिणे नरेन्द्र-मोदिने तस्य जन्मदिवसे हार्दिक्यः शुभाशंसाः प्राकटयताम्



राष्ट्रपतिः द्रौपदी-मुर्मुः, उपराष्ट्रपतिः सी.पी. राधाकृष्णन् इत्येतौ प्रधानमन्त्रिणे नरेन्द्र-मोदिने तस्य जन्मदिवसे हार्दिक्यः शुभाशंसाः प्राकटयताम्। सामाजिक-सञ्चारपटले सन्देशं प्रेषयन्ती राष्ट्रपतिः मुर्मुः विगतेषु पञ्चविंशति-वर्षेषु श्रीमोदिनः अनुकरणीयां लोक-सेवाम् राष्ट्र-निर्माणाय च तस्य अभूतपूर्वं योगदानं प्राशंसत्। उपराष्ट्रपतिना न्यरूप्यत यत् श्रीमोदिनः दूरदृष्टि-सम्पन्ने नेतृत्वे भारतं विश्वस्मिन् एकं प्रकाशमान-केन्द्रत्वेन विभाति, अथ च विश्वस्य तीव्रगत्या वर्धमानासु प्रमुख-अर्थव्यवस्थासु अन्यतमं वर्तते। अपरत्र काङ्ग्रेस अध्यक्षः मल्लिकार्जुन खड़गे, लोकसभायाः विपक्ष-नेता राहुल गान्धी चापि प्रधानमन्त्रिणं नरेन्द्रमोदिनं जन्मदिवसस्य शुभाशयान् व्याहरताम्।




# भारतेन पाकिस्ताने आतङ्की-संरक्षणस्य निन्दा कृता

संयुक्त-राष्ट्र-सुरक्षा-परिषदि अफ़ग़ानिस्तान-विषयिणीं चर्चाम् अधिकृत्य भाषमाणेन भारतस्य स्थायी-प्रतिनिधिना पी. हरीश-महोदयेन पाकिस्तान-देशाय आतङ्कवादिभ्यः अबाधित-अनुकूल-पर्यावरण-प्रदानस्य कारणेन तीक्ष्णः उद्वेगः प्रकटितः। हरीश-वर्येण पाकिस्ताने स्थितानाम् आतङ्कवादी-सुरक्षित-शरणस्थलानां तथा च संयुक्त राज्य अमेरिकायां सञ्जातस्य भीषण-आतङ्की-आक्रमणस्य उत्तरदायीनाम् 'अल-कायदा' नेतृणां मध्ये हेतु सीध्य भावः रेखाङ्कितः। न्यूयार्क-नगरे स्मारकस्य सुरक्षा परिषदः सम्प्रति-निर्वृत्तं भ्रमणं स्मरयन् तेन जागतिक-समुदायः आहूतः यत् न केवलम् आतङ्कवादिनः, अपितु तेभ्यः साहाय्य-वित्त-आश्रय-प्रदातारः अपि दण्डनीयाः। मन्त्रिणा प्रतिपादितं यत् वातावरणं आक्रमणस्य सूत्रधारान् अशिश्रियत्, तदेव अद्यत्वे अपि 'लश्कर-ए-तैयबा', 'जैश-ए-मोहम्मद' इत्येतादृशानाम् अल-कायदा-सम्बद्धानाम् आतङ्की-सङ्घटनानां निरुपाधिकं पोषणं करोति। पी. हरीश-महोदयेन संसूचितं यत् 2/11 षड्यन्त्रेण सम्बद्धाः बहवः वरिष्ठ-अल-कायदा-नेतारः अनन्तरं पाकिस्ताने एव सम्प्राप्ताः बन्धकाश्च अभवन्।

# केन्द्रीय-पृथिवी-विज्ञान-मन्त्री अत्याधुनिक-डाप्लर-ऋतु-रडार-यन्त्रस्य उद्घाटनम् अकरोत्

केन्द्रीय-पृथिवी-विज्ञान-मन्त्री डॉ. जितेन्द्र सिंहः ओडिशा-राज्यस्य सम्बलपुरे भारतस्य एकपंचाशत् तमस्य अत्याधुनिक-डाप्लर-ऋतु-रडार-यन्त्रस्य आभासि-माध्यमेन उद्घाटनम् अकरोत्। अस्मिन् अवसरे सम्बोधयन् मन्त्रिणा प्रोक्तं यत् गतद्वादश-वर्षेषु देशे डाप्लर-रडार-यन्त्राणां सङ्ख्या चतुर्दशतः एकपंचाशत्-पर्यन्तं प्रवर्धिता अस्ति। डॉ. सिंहेन संसूचितं यत् 'मिशन-ऋतु' इत्यस्य अभियानस्य अन्तर्गतं चत्वारिंशत् अतिरिक्तानाम् आधुनिक-रडार-यन्त्राणां प्रतिष्ठापनं नियोजितम् अस्ति। मन्त्रिणा प्रतिपादितं यत् एषः विस्तारः ऋतोः सूक्ष्मावलोकनाय, अवबोधनाय, तथा च प्रतिक्रिया-प्रदानाय भारतस्य सामर्थ्य-संवर्धनस्य सर्वकारस्य व्यापक-प्रयासस्य एकः अबाधित-प्रामाणिक-अंशः अस्ति।

# तमिलनाडुराज्ये प्रसिद्धस्य मदुरैमीनाक्षीमन्दिरस्य महाकुम्भाभिषेकसमारोहः सप्तदशवर्षान्तरं सम्पन्नः

तमिलनाडुराज्ये प्रसिद्धस्य मदुरैमीनाक्षीमन्दिरस्य महाकुम्भाभिषेकसमारोहः सप्तदशवर्षान्तरम् सम्पूर्णश्रद्धाभावेन सम्पन्नः। कार्यक्रमस्य आरम्भः पुरोहितैः द्वादशसु गोपुरेषु पवित्रजलं प्रदाय पूजा-अर्चनात्मकं कृतः। महाकुम्भाभिषेकस्य अस्मिन् ऐतिहासिकवसरे सहस्रशः श्रद्धावन्तः उपस्थिता आसन्, राज्यस्य मन्त्री सी.टी.आर. निर्मलकुमारः अपि कार्यक्रमांशः आसीत्। अस्मिन् समये श्रद्धालुभ्यः भोजनमपि वितीर्यते।



# टाटासमूहस्य अध्यक्षपदे एन. चन्द्रशेखरनस्य पञ्चवर्षाय पुनर्नियुक्तिः




**जमशेदपुरम् १७ सितंबर २०२६**
**हिमसंस्कृतवार्ताः- डॉ विमलेश झा**

देशस्य प्रमुखतमेषु औद्योगिकसमूहेषु अन्यतमस्य टाटासमूहस्य विषये महत्त्वपूर्णः समाचारः प्राप्तः अस्ति। टाटासन्ससंस्थायाः अध्यक्षपदे एन. चन्द्रशेखरनस्य पुनर्नियुक्तिः कृता अस्ति। संस्थायाः सञ्चालकमण्डलेन तस्य आगामी-पञ्चवर्षीयकार्यकालाय पुनर्नियुक्तेः अनुमोदनं कृतम्। अनेन निर्णयेन चन्द्रशेखरनः आगामीपञ्चवर्षपर्यन्तं टाटासमूहस्य अध्यक्षपदं धारयिष्यति। अस्य महत्त्वपूर्णस्य निर्णयस्य समये टाटाट्रस्टसंस्थायाः अध्यक्षः नोएलटाटामहोदयः पुनर्नियुक्तेः विषये स्वसम्मतिं न दत्तवान्। सञ्चालकमण्डलस्य सदस्यानां मध्ये केवलं स एव अस्य निर्णयस्य समर्थनं न कृतवान्। अन्यैः सर्वैः सञ्चालकमण्डलस्य सदस्यैः चन्द्रशेखरनस्य पुनर्नियुक्तेः समर्थनं कृतम्। रोचकं तथ्यं यत् एन. चन्द्रशेखरनस्य पुनर्नियुक्तिः तस्मिन् समये अभवत्, यदा एकमासपूर्वम् एव सः स्वस्य पुनर्नियुक्तिविषये सन्देहः प्रकटितवान् आसीत्। गतफरवरीमासे आयोजितायां सञ्चालकमण्डलस्य सभायां तेन स्वस्य भविष्ययोजनानां निर्णयानां च विषये चर्चा कृता आसीत्। ततः तस्य भविष्यं प्रति विविधानि अनुमानानि प्रारब्धानि आसन्।
किन्तु अधुना सञ्चालकमण्डलस्य अनुमोदनानन्तरं स्पष्टं जातम् यत् आगामीपञ्चवर्षपर्यन्तं टाटासमूहस्य नेतृत्वं एन. चन्द्रशेखरनस्य हस्तेष्वेव स्थास्यति। सूत्रैः प्राप्तानां वार्तानुसारं टाटाट्रस्टसंस्थायाः अध्यक्षः नोएलटाटामहोदयः एन. चन्द्रशेखरनात् कतिपयानि महत्त्वपूर्णानि आश्वासनानि याचितवान् आसीत्। एषा अपेक्षा मुख्यतः धारकसंस्थायाः टाटासन्ससंस्थायाः विषये वर्धमानानां नियामक प्रभावानां अनुपालनसम्बद्धानां च आव्हानानां समाधानं कथं करिष्यते इति विषयम् आश्रित्य आसीत्। अस्याः आन्तरिकचर्चायाः मतभेदस्य च कारणेन सञ्चालकमण्डलस्य सभायां निर्णयः सर्वसम्मत्या न अभवत्। अतः नोएलटाटामहोदयः एतस्य पुनर्नियुक्तेः समर्थनात् विरतः अभवत्। सञ्चालकमण्डलस्य अन्येषां सर्वेषां सदस्याणां समर्थनात् एन. चन्द्रशेखरनस्य कार्यकालविस्तारः निश्चितः अभवत्। आगामिषु वर्षेषु तस्य पुरतः टाटासमूहस्य विकासं नूतनशिखरं प्रति नेतुं, वर्धमानानां नियामकसमस्यानां समाधानं कर्तुं, अनुपालनसम्बद्धानां विषयाणां च प्रभावीरूपेण प्रबन्धनं कर्तुं महत्त्वपूर्णानि दायित्वानि भविष्यन्ति।

# 'पी.एम. विश्वकर्मा-योजना' वर्षत्रयं पूर्णम् अकरोत्

पारम्पारिक-शिल्प-कलानां पुनरुद्धारं कुर्वती 'पी.एम. विश्वकर्मा-योजना' वर्षत्रयं पूर्णम् अकरोत्। प्रधानमन्त्रिणा मोदिना देशस्य शिल्पि-वृन्दस्य अभ्युदयाय अस्याः योजनायाः बीजारोपणं कृतम्। एतेन तक्षा-स्वर्णकार-कुम्भकारादयः अङ्कीय-शक्त्या स्वावलम्बिनः सञ्जाताः, येन ग्रामीण अर्थव्यवस्था समुदञ्चिता अभवत्।



# रुसात् अशोधितशिलातैलं क्रेतृदेशेषु

## शतप्रतिशतशुल्कयुक्तं विधेयकम अमेरिका द्वारा पारितम्




सर्वकारेणोक्तं यत् देशस्य आर्थिकहितानां रक्षणाय ऊर्जासुरक्षायाः सुनिश्चयाय च सर्वाणि आवश्यकानि पादानि गृहीष्यन्ते। विदेशमन्त्रालयेनोक्तं यत् भारतं १२० कोटिमितस्य (चतुर्दशकोटिमितस्य) जनसङ्ख्यायाः कृते ऊर्जासुरक्षां सुनिश्चेतुं दृढसङ्कल्पितम अस्ति, सर्वकारश्च विविधस्रोतोमाध्यमेन परिवर्तमानेषु वैश्विकेतरदृश्यासु ऊर्जासुनिश्चेतनम् निरन्तरं दास्यति। मन्त्रालयस्य इदं वक्तव्यम् अमरीकायाः प्रतिनिधिभाषया (संसदा) एकस्य विधेयकस्य पारितीकरणस्य मध्ये समागतम्। अस्मिन् राष्ट्रपतिं डोनल्ड-ट्रम्पम् भारत-चीनसदृशेषु देशेषु रुसात् कच्चतैलक्रयस्योपरि शतप्रतिशतपर्यन्तं शुल्कस्य आरोपणस्य अनुमतिः प्रदत्ता अस्ति। विदेशमन्त्रालयेनोक्तं यत् अस्मिन् विषये गतमासेषु अमरीकीयवार्ताकारैः सह चर्चिता अभूत्। भारतस्य द्विपक्षीयसम्बन्धैः सह अन्तर्राष्ट्रीयऊर्जा विपण्यां) अस्य सम्भावितप्रभावाः अपि स्पष्टतया प्रकाशिताः सन्ति। मन्त्रालयेनोक्तं यत् भारतेन स्वव्यापारिक-आर्थिकहितानां रक्षणाय सर्वाणि आवश्यकानि उपायानि कर्तुम् अपनी प्रतिबद्धता अपि स्पष्टीकृता अस्ति। सर्वकारेणोक्तं यत् सा एतेषां घटनाक्रमस्य प्रभावैः योद्धुम् भारतीयव्यापार-उद्योगनिकायैः सह मिलित्वा कार्यं करिष्यति। प्रतिनिधिभाषया (संसदा) ह्यः इदं विधेयकम पारितम्। राष्ट्रपतेः हस्ताक्षरमात्रेण एव एतत् कानूनं भविष्यति। विधेयके रुसस्य नेत्राणां ऊर्जाक्षेत्रस्य चोपरि प्रतिबन्धेन सह तैः गुप्तपोतानां यूथैः (बेड़े) अपि प्रतिबन्धस्य प्रस्तावः अस्ति येषां साहाय्येन रुसं तैलपूर्तिकृतप्रतिबन्धात् रक्षितं भवति। अस्मिन् राष्ट्रपतिं ट्रम्पं चीनस्य, भारतस्य अन्यदेशानां च रुसस्य तैल-गैसयोः निर्भरतां न्यूनीकतुं कठोरशुल्कस्य आरोपणस्य अधिकारप्रदानस्यापि प्रस्तावः अस्ति। अनेनैव सह ईरानोपरि अतिरिक्तप्रतिबन्धस्यापि प्रावधानं विद्यते।

# उद्यानपालकेभ्यः सर्वकारस्य महदोपहारः, एमआईएस- अन्तर्गतं प्रति-किलोग्रामं त्रीणि रूप्यकाणि वर्धिष्यन्ते सेव-मूल्यानि




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य फल-उत्पादकेभ्यः (उद्यानपालकेभ्यः) राज्यस्य सुक्खू-सर्वकारः महदोपहारं प्रदातुं सज्जः अस्ति। प्रदेशे 'विपणन-हस्तक्षेप-योजनायाः' क्रयण-प्रक्रियायाः अन्तर्गतं सेवफलस्य न्यूनतम-समर्थनमूल्यं वर्धयितुं विचारः क्रियते। अस्मिन् सन्दर्भे सर्वकारस्तरे व्यापकविमर्शः प्रचलति। आगामिकाले सेव-क्रयणमूल्यं संवर्ध्य प्रति-किलोग्रामं पञ्चदश (१५) रूप्यकाणि विधास्यते। एतदर्थं सर्वकारेण प्रस्तावः सज्जीकृतः अस्ति। आगामिनि विधानसभायाः शीतकालीनसत्रे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अस्य औपचारिकाम् उद्घोषणां कर्तुं शक्नोति। साम्प्रतं 'एचपीएमसी' माध्यमेन कृषकेभ्यः द्वादश रूप्यकाणि प्रति-किलोग्रामं समर्थन-मूल्यं दीयते, यस्मिन् सर्वकारः विपुलं धनभारं वहति। गते वित्त-वर्षे (२०२५-२६) एमआईएस-अन्तर्गतं प्रदेशे एक-लक्ष-मीट्रिक-टन परिमितं सेव-क्रयणं कृतम् आसीत्, यत्रैव अस्मिन् वर्षे अल्प-उत्पादनात् अद्यावधि प्रायः षट्-सहस्र (६०००) मीट्रिकटन परिमितम् एव क्रयणं जातम्। एतादृश्यां स्थितौ मूल्यवृद्धौ सत्यां शिमला, किन्नौरः, लाहुल-स्पीति', कुल्लू, चम्बा, मण्डी, सिरमौर-प्रभृति-मण्डलानां लक्षाधिकाः उद्यानपालकाः लाभान्विताः भविष्यन्ति। विदितं स्यात् यत् प्रतिकूल-ऋतु-कारणात् यत् सेवफलं वृक्षात् पतति, तस्य 'सी-श्रेण्याः' फलानां क्रयणं सर्वकारः करोति, येन 'एचपीएमसी' द्वारा फलमद्यं, रस-उत्पादाः च निर्मीय विपणौ विक्रीयन्ते।

### षष्टि-प्रतिशतं (६०%) जनाः अनुबन्धे यच्छन्ति फलवाटिकाः; मध्यस्थाः न लप्स्यन्ते लाभम्

राज्यस्य षष्टि-प्रतिशताधिकाः (६०%) उद्यानपालकाः स्व-वाटिकाः मध्यस्थेभ्यः अनुबन्धेन प्रयच्छन्ति। किन्तु अधुना ते मध्यस्थाः एमआईएस- अन्तर्गतं फल-विक्रयणं कर्तुं न शक्ष्यन्ति। अस्य क्रयणस्य कृते साम्प्रतं भूमेः अधिकृतं' भू-स्वामित्व-प्रमाणपत्रम् (जमाबन्दी) याच्यते, येन मध्यस्थानां वञ्चना समाप्ता भविष्यति। अनेन वास्तविक-उद्यानपालकाः साक्षात् फलानि विक्रीय लाभं प्राप्स्यन्ति, एमआईएस- धनराशिः च साक्षात् तेषां वित्तकोष-संख्यासु गमिष्यति।

# शिवागम-साधकाः १८ सितम्बर-दिनाङ्के करिष्यन्ति डल-सरोवरावरण-भेदम्; तदनन्तरं प्रारप्स्यते पवित्रं 'शाहीस्नानम्'




**हिमसंस्कृतवार्ताः- चम्बा।** त्रिलोचन-महादेवस्य वंशजाः सञ्चूई-ग्रामस्य शिव- शिष्याः (शिवागम-साधकाः) शुक्रवासरे मध्याह्ने द्वादशवादने (१२:००) डलसरोवरे सम्प्राप्य 'सरोवर-भेदन-विधिम्' सम्पादयिष्यन्ति। धार्मिक-मान्यतानुसारं राधाष्टमी-पर्वणि सम्पद्यमानेन अनेन अनुष्ठानेन सहैव श्रीमणिमहेश-यात्रायाः महत्त्वपूर्णं धार्मिकचरणं परिपूर्णं भवति। राधाष्टम्याः पावनपर्वणि डल-सरोवर-भेदनस्य शताब्दयः पुरातनी परम्परां निर्वोढुं सञ्चूई-ग्रामस्य शिव-शिष्याः गुरुवासरे भरमौरतः मणिमहेशं प्रति प्रस्थिताः। प्रसिद्ध-चौरासी-मन्दिरस्य परिक्रमाम् अनुष्ठाय, श्रीमणिमहेशमन्दिरे च दर्शन-पूजनानन्तरं शिवसाधकैः तत्र उपस्थिताः शिव-भक्ताः आशीर्भिः समलङ्कृताः।
ततः परं दलं डल-सरोवरं प्रति अग्रेसरम् अभवत्। सञ्चूई-ग्रामस्य शिव-साधकानां निर्गमने सति मार्गे स्थाने-स्थाने स्थानीय-जनैः तीर्थयात्रिकैश्च तेषां भव्यं स्वागतं विहितम्। शिवभक्तैः जयघोषैः तेषाम् उत्साहवर्धनं कृतम्। धार्मिक-आस्थया सम्बद्धम् इमं महत्त्वपूर्णं सोपानं दृष्ट्वा यात्रिकेषु अतीव उल्लासः दृश्यते।

### दशनामी-अखाड़ादलस्य पवित्र-यष्टिभिः (छड़ी) सह प्रस्थानम्

सञ्चूई-ग्रामस्य शिवशिष्यैः सह दशनामी-अखाड़ादलस्य यष्टिः, कार्त्तिकेय-स्वामिनः यष्टिः, चरपटनाथस्य यष्टिः, तथा भादवाही-क्षेत्रस्य यष्टिः (पवित्र-धर्म-यष्टयः) अपि डल-सरोवरं प्रति प्रस्थिताः सन्ति। सर्वाः एताः धर्म-यष्टयः शिव-साधकाश्च गुरुवासर-रात्रौ 'धनछोह'-नामके सुरम्य- विश्राम- स्थले विश्रामं करिष्यन्ति। शुक्रवासरे प्रातःकालात् अत्रत्यः अग्रिम-प्रवासः समारप्स्यते, मध्याह्ने च ते डल-सरोवरं प्राप्स्यन्ति। अस्मिन् अवसरे सरोवरे स्नानार्थं सहस्रशः भक्तानां सम्मेलनस्य सम्भावना वर्तते।

# सितम्बरमासे रोहताङ्ग-प्रभृति-शिखरेषु हिमपातस्य शुभ्राच्छादनम्; त्रिहोराः यावत् स्थगिता मणिमहेशयात्रा



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशे गुरुवासरे सहसैव ऋतु-परिवर्तनं दृष्टम्। रोहताङ्ग-गिरिद्वारे, धौलाधार-पर्वतमालासु, साचघाटीमार्गे, पवित्रमणिमहेशे च समुन्नतशिखरेषु नूतनः हिमपातः जातः, यत्रैव समतल- मध्य-पर्वतीयक्षेत्रेषु धारासारवृष्ट्या जनजीवनं दुष्प्रभावितम् अभवत्। चम्बामण्डलस्य मणिमहेशतीर्थे हिमपातेन तीर्थयात्रिकाणां सुरक्षायै प्राभातिकी यात्रा त्रि-होराः यावत् स्थगिता अभवत्। भरमौरस्य अलमीक्षेत्रे तडिताघातेन सप्तविंशतिः (२७) मेष-अजाः पञ्चत्वं गताः, बह्व्यश्च क्षतविक्षताः अभवन्। मण्डी-मण्डलस्य सुन्दरनगरे प्रचण्ड-भूस्खलनेन द्वौ त्रि-तृतलीय-गृहे भग्नावशेषे जाते, द्वे वाहने च मलिनावशेषे निमग्ने। ऊनामण्डले वृष्ट्या आलुक-शस्यस्य क्षतिः सञ्जाता, कुल्लू- उपरि-शिमलाक्षेत्रेषु सेव- दाड़िम- प्राच्य-फलानां (जापानी फल) शातनं प्रभावितम् अभवत्। गुरुवासर-सायङ्कालं यावत् राज्ये षष्टिः (६०) मार्गाः अवरुद्धाः, एकत्रिंशत् (३१) विद्युत्- परिवर्तकाः च निष्प्रभावाः अभवन्।

## पवित्र-मणिमहेशपरिसरे प्रायः दश- सेंटीमीटर- परिमितः हिमपातः

चम्बामण्डले प्रातःकाले सुन्दरासी, गौरीकुण्ड, च पवित्र-मणिमहेशक्षेत्रेषु दश-सेंटीमीटर-परिमितः हिमपातः पञ्जीकृतः। प्रातःकाले डल-सरोवराभितः हिम-पतनानन्तरं प्रशासनेन सुरक्षार्थं यात्रा निरुद्धा। तथापि ऋतु-स्वच्छतानन्तरं त्रि-होराभ्यन्तरे एव यात्रा पुनः समारब्धा। तीर्थयात्रिकैः हिमपातस्य आनन्दः अपि अनुभूतः। भरमौरस्य अलमीक्षेत्रे प्रभाते वज्रपातेन मेषपालकः भिन्दर-नामकः अपि दग्धः जातः, सप्तविंशतिः पशवश्च मृताः।

## साच-घाटी-मार्गे त्रिंशत्-सेंटीमीटर-परिमितः हिमपातः

साच-घाटीमार्गे प्रायः त्रिंशत् (३०) सेंटीमीटर-परिमितः हिमपातः अभवत्, येन बैरागढ-साचपास- किलाड़-मार्गः अवरुद्धः जातः तथा च पाङ्गी- उपत्यकायाः मण्डल-मुख्यालयेन सह सम्पर्कः छिन्नः। द्वाविंशति-परिवर्तकानां विकलतया ११० ग्रामेषु विद्युत्-प्रवाहः अवरुद्धः। कुल्लू-लाहुल-स्पीति-मण्डलयोः रोहताङ्ग, बारालाचा, कुञ्जम, शिङ्कुला इत्यादिषु शिखरेषु विरामानन्तरं हिमपातः जातः, अधस्तन-क्षेत्रेषु च वृष्टिः प्रवृत्ता। अनेन शैत्यं प्रवृद्धं जनैश्च ऊर्णवस्त्राणि धृतानि। मण्डलेषु सेव-फल-पेटीकानां वहनम् अपि मन्दगत्या प्रचलति।

## भूस्खलनेन गृहाणि भग्नानि, किन्नौर-कैलाशेऽपि हिमपातः

मण्डी-जनपदस्य सुन्दरनगर-उपमण्डले चुरढ-विद्यालयसमीपे मध्याह्नात् परं भूस्खलनेन द्वे त्रितलीये भवने भग्ने अभवताम्। पर्वत-स्खलनेन विशालाः शिलाः भवनानि आक्रान्तवन्तः, येन एकस्य गृहस्य चत्वारः पिधानकाः निमग्नाः, द्वे कारवाहने च विनष्टे। करसोग-शिमला-मार्गे चैलचौक- तत्तापानी-मार्गे च मलिनावशेष-पातेन यातायातम् अवरुद्धं जातम्। किन्नौर- कैलाश-शिखरेऽपि मन्दः हिमपातः संवृत्तः। काङ्गड़ा-शिमला- रामपुर- ऊना-प्रभृतिषु स्थानेषु मेघमालाः धारासारं वर्षन्ति, प्राभातिके काले च सर्वत्र शैत्यस्य प्रभावः दृष्टः।

# सङ्कटे हिमाचलस्य सुरम्यः विहगः, गिरेः दुर्लभं न्यासं रक्षिष्यति वन्य-प्राणि-विभागः

**हिमसंस्कृतवार्ता — शिमला।**
हिमाचले दुर्लभस्य सङ्कटापन्नस्य चीर-मयूर-सदृश-विहगस्य च ( चीर-फिजेंट/Catreus wallichii) संरक्षणाय वन-विभागः नूतनां योजनां निर्मातुं सज्जः अस्ति। एतदर्थं विभागस्य वन्य-प्राणि-पक्षः 'भारतीय-वन्यजीव-संस्थानस्य' साहाय्यं स्वीकरिष्यति। प्रस्ताविते अस्मिन् प्रकल्पे 'कैम्पा' (CAMPA) इत्यस्य अन्तर्गतं राज्ये प्राप्यमाणा धनराशिः प्रयोक्ष्यते। वन्य-प्राणि-पक्षेण योजना-कार्याणि आरब्धानि इति वृत्तस्य पुष्टिः वन्य-प्राणि-पक्षस्य प्रधान-मुख्य-अरण्यपालेन आलोकप्रेमनागर-महोदयेन कृता। विदितं स्यात् यत् चीर-विहगस्य संवर्धनाय शिमलायाः चायल-स्थिते संरक्षण-केन्द्रे कार्यं प्रचलति, किन्तु अधुना अस्य संरक्षण-प्रयासेभ्यः गतिं प्रदातुं नूतन-प्रकल्पे कार्यं क्रियते। चायल-क्षेत्रातिरिच्य सराहन-क्षेत्रेऽपि अस्य संरक्षणाय विशेषा योजना विधास्यते। विभागस्य मतेन चीर-विहगस्य अण्डेभ्यः शावकानां निष्कासने (Hatching) काठिन्यम् उत्पद्यते, अतः तस्याः समस्यायाः समाधानाय विशेषज्ञैः सह मिलित्वा कार्यं भविष्यति येन राज्ये एतेषां सङ्ख्या संवर्धेत।

## प्राकृतिक-वातावरणे मोक्ष्यन्ते त्रिंशत् (३०) विहगाः

वन्य-प्राणि-पक्षेण कृत्रिम-प्रजननस्य (Captive Breeding) माध्यमेन एतेषां वंश-वृद्धिः कृता अस्ति। अधुना चायल-वनेषु त्रिंशत् (३०) चीर-विहगाः स्वच्छन्द-वातावरणे मोक्तुं सज्जीकृताः। वने विमुक्तेभ्यः एतेभ्यः विहगेभ्यः वन्य-जीव-दलैः तेषां व्यवहारे गतिविधिषु च सततं दृष्टिः स्थापयिष्यते। कृत्रिम-परिवेशात् बहिरागत्य ते वन्य-परिवेशे कथम् आत्मानम् अनुकूलायन्ति, तेषां स्वास्थ्यं जीवन-क्षमता च कीदृशी अस्ति, इत्यस्य विशेषज्ञैः परीक्षणं क्रियते येन आवश्यकाः संरक्षण-उपायाः सम्पाद्येरन्।




## नेपाल-पाकिस्थानयोः अपि अस्ति आवासः

चीर-विहगः हिमालयी-क्षेत्रस्य दुर्लभः संरक्षितश्च पक्षी वर्तते। वनानां विलोपेन, प्राकृतिक-आवासानां सङ्कोचेन, अवैध-मृगयया च अस्य सङ्ख्यायां क्षयः जातः। अयं हिमाचलम् अतिरिच्य उत्तराखण्डस्य, नेपालस्य, पाकिस्थानस्य च हिमालयी-भूभागेषु प्राप्यते। अयं विहगः सामान्यतया समुद्रतलात् १५०० तः ३००० मीटर्-उन्नतेषु पर्वतीय-क्षेत्रेषु निवसितुं रोचयति।

## दीर्घ-पुच्छः धूसर-पक्षश्च अस्य स्वरूपम्

चीर-विहङ्गस्य पक्षाः धूसर-वर्णीयाः (भूरे) भवन्ति। नेत्रयोः परितः पाटलोहितः (गुलाबी-लाल) वलयः दीर्घा च पुच्छ-पङ्क्तिः अस्य प्रमुखा पहिचानः अस्ति। प्रधान-मुख्य-अरण्यपालः आलोकप्रेमनागरः अवदत् यत् भारतीय-वन्यजीव-संस्थानेन सह मिलित्वा निर्मितायाः अस्याः योजनायाः कृते राज्य-'कैम्पा'-कोषात् धनस्य प्रबन्धः विधास्यते।



# उन्नाव संस्कृतप्रतिभा अन्वेषणप्रतियोगिता- २०२६ भव्य-आयोजनं सम्पन्नम्

उन्नाव। उत्तरप्रदेशसंस्कृतसंस्थानेन समायोजिता संस्कृतप्रतिभा अन्वेषण-प्रतियोगिता २०२६
१५ सितम्बर २०२६ दिनाङ्के प्रातः ९ वादनात् आरभ्य उन्नाव नगरस्य पी.एम.श्री राजकीय इण्टर कालेज,चमरौली इत्यस्मिन् विद्यालये, अपराह्ने त्रिवादन, पर्यन्तम् आयोजिता।
कार्यक्रमस्य आरम्भः मुख्यातिथिः श्री ओमशंकर मिश्रः वर्यः सरस्वत अतिथिः, निर्णायकमण्डलम्, तथा च मार्गदर्शकशिक्षकाः देवी सरस्वती प्रतिमायाः माल्यार्पणं कुर्वाणः दीपप्रज्वलनं कृतवन्तः। कार्यक्रमस्य अध्यक्षाः प्रधानचार्यः श्री अरविन्द कुमार कुरील महाभागाः आसन्। विद्यालयस्य बालिकाः अतिथिस्वागतार्थं सरस्वतीवन्दनं, संस्कृतभाषायां स्वागतगीतस्य गायनं कृतवत्यः।
जनपदसंयोजकः रामप्रकाश शुक्लः स्वागतभाषणं कुर्वन् अतिथि जनेभ्यः स्मृति चिन्हप्रदानेन आतिथ्यं कृतवान्। मुख्यातिथिः सरस्वत-अतिथिः च प्रतिभागिभ्यः शुभकामनासन्देशं अर्पितवन्तः, अध्यक्षभाषणान्तरं स्पर्धा आरब्धा ।
संस्कृतगीतप्रतियोगितायाः निर्णयः डॉ. विवेकमिश्रः, विनयदीक्षितमहोदयः कृतवान्।
प्रतियोगितायाः परिणामः

- प्रथमस्थाने नन्दिनी राजपूत — पीएम श्री रा.इ. कालेज , चमरौली
- द्वितीयस्थाने कोमल — रा. बा. इ. कालेज , पड़री खुर्द
- तृतीयस्थाने अर्जुनः— जय प्रकाश नारायण सर्वोदय विद्यालयः न्योतनी उन्नावः
- सान्त्वना पुरस्कार : संजना, काजल, तथा च रेणु शर्मा प्राप्तवत्यः।

संस्कृतसामान्यज्ञानप्रश्नोत्तरप्रतियोगितायाः निर्णयः संगमबाजपेयीमहोदयेन डॉ.मुदिताअस्थानया च कृतम् ।
परिणामः

- प्रथमं स्थानम् -पुष्पा
- द्वितीयस्थानम्- निकिता
- तृतीयस्थानम् - नितांशुः

एते सर्वे प्रतिभागिनः रा.इ.का.चमरौली विद्यालयस्य छात्राः।

- सान्त्वना पुरस्कारः क्रमशः नितिन, जाह्नवी एवं सिद्धार्थ त्रिवेदी प्राप्तवन्तः। प्रतियोगितायां जनपदस्य शासकीय अशासकीय स्ववित्तपोषित विद्यालयेभ्यः द्विचत्वारिंशत् (४२) प्रतिभागिनः भागं गृहीतवन्तः पुरस्कारप्रमाणपत्र- प्रदानानन्तरं जनपदसंयोजकः राम प्रकाश शुक्लः समागतेभ्यः निर्णायकेभ्यः शिक्षकेभ्यः प्रतियोगिभ्यः सहायकेभ्यश्च कार्तज्ञं निवेदितवान्।

कार्यक्रमस्य समापनम् अपराह्ने ३:०० वादने राष्ट्रगानेन शान्तिपाठेन च अभवत्।

# खगडियामण्डले भगवत:विश्वकर्मण:पूजावसरे द्विदिवसीयस्य महोत्सवात्मकस्य मेलायाः भव्यमायोजनम्



हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, खगडिया

खगडियाजनपदे देवशिल्पिनः भगवतः विश्वकर्मणः पूजनोत्सवस्य उपलक्ष्ये सर्वत्र महदुत्साहस्य श्रद्धायाश्च वातावरणं दृश्यते। एतस्मिन् महोत्सवे परबत्ताचौथमप्रखण्डयोः पञ्चसु प्रमुखस्थानेषु द्विदिवसीयस्य मेलायाः भव्यमायोजनं कृतमस्ति। परबत्ताप्रखण्डस्य खीराडीहग्रामस्थे विश्वकर्ममन्दिरे, चौथमप्रखण्डस्य सोनबरसाघट्टे, कैथीनयाटोलायां, नवादायां धुतौलीग्रामे च आकर्षकमण्डपानि निर्मितानि सन्ति। पूजामण्डपेषु भगवतः विश्वकर्मणः दिव्यप्रतिमायाः अतिरिक्तं सीतारामयोः, राधाकृष्णयोः, उमामहेश्वरयोः, गणेशस्य, हनुमतः, सत्यव्रतहरिश्चन्द्रस्य च सपरिवारस्य विग्रहाः प्रतिष्ठापिताः सन्ति। मण्डपेषु अखण्डसीताराम- नामसङ्कीर्तनं (रामधुनम्), भक्तिसङ्गीतं तथा निशायां कुशलकलाकाराणां सांस्कृतिककार्यक्रमाः प्रचलन्ति। मेलाप्राङ्गणे बालकानां मनोरञ्जनाय दोलाः, विविधक्रीडनकानां मिष्टान्नानां च विपणयः सुसज्जिताः वर्तन्ते, यत्र भक्तानां विपुलः जनसम्मर्दः दृश्यते। सोनबरसाघट्टे मोटरयानचालकसङ्घस्य ग्रामस्थानां च परस्परसहयोगेन श्रद्धाभावेन चेदम् आयोजनं साफल्यं प्राप्नोति। मेलासमित्या भक्तानां सुविधायै सुरक्षाव्यवस्था कृता वर्तते।मेलासमित्या सह सम्बद्धाः अधिकारिणः सूचितवन्तः यत् प्रतिवर्षम् इव अस्मिन् वर्षे अपि चालकबान्धवाः पारस्परिक-सहयोगेन देवशिल्पिनः भगवतः विश्वकर्मणः पूजनोत्सवं श्रद्धया भक्त्या च आचरन्ति। मेलासमित्याः वरुणसिंहः (सरदार जी), उपाध्यक्षः सुभाष साहः, कोषाध्यक्षः सलेनकुमारसिंहः, सचिवः रङ्गीलसहनी, उपसचिवः देवो सदा, सदस्याः अञ्जय पासवानः, कारचालकाः, अबोध पासवानः च एतस्मिन् आयोजने सक्रियरूपेण संलग्नाः सन्ति। अस्मिन् आयोजने ग्रामस्थानां भक्तानां च मध्ये महदुत्साहः श्रद्धा च दृश्यते।

## रविः खरिडेहालः - बेङ्गलूरु ।

# "जन्-एआइ-संस्थया एआइ-प्रौद्योगिक्याः परिवर्तन-शक्तिः उपयोक्तव्या"

हिम-संस्कृत-वार्ताविवर्णनम् ।भारतस्य कृते प्रौद्योगिकीं न कर्त्रयन्तु, भारतस्य कृते योजना-चिकीर्षन्तु ।जन्-एआइ-संस्थया एआइ प्रौद्योगिक्या च १० कोटिग्रामीणगृहेषु परिवर्तनं भविष्यति।७५ वर्षेषु भ्रमणध्वनियन्त्रस्य उपयोगेन अङ्कीयरूपान्तरणं विहाय ग्रामाः बहुधा अपरिवर्तिताः एव सन्ति ।सामान्यतया नगरीयक्षेत्रेभ्यः अनुकूलाः प्रौद्योगिकी-उत्पादाः केवलं मूल्यानि न्यूनीकर्तुं ग्रामीणक्षेत्रेभ्यः अनुकूलाः निर्मिताः । तेन परिवर्तनस्य पूर्णशक्तिः न प्रयुक्ता ग्रामेषु च प्रगतिः न दृश्यते। ग्रामीणक्षेत्रेषु जनाः सामान्य-एआइ-उत्पादानाम् उपयोगं कुर्वन्ति अतः अनुरूपं ग्रामीण-एआइ-उत्पादानाम् अनुकूलनं कठिनं न भविष्यति। १० कोटिगृहेषु प्रतिगृहे १०,००० रुप्यकाणां मानेन प्रायः १००००० कोटिरूप्यकाणां उत्पादनं कर्तुं शक्यते । यत् प्रायः १०० बिलियन् डॉलरं यावत् आर्थिकमूल्यं भवति ।

# बिहारराज्यस्य प्रसिद्धेन बालुकाशिल्प- कलाकारेण मधुरेन्द्रकुमारेण प्रधानमन्त्रिणः जन्मदिने अद्भुतकलाकृतिः निर्मिता





**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भागलपुरम्** बिहारराज्यस्य प्रसिद्धः बालुकाशिल्पकलाकारः मधुरेन्द्रकुमारः प्रधानमन्त्रिणः नरेन्द्रमोदिनः जन्मदिवसस्य अवसरे एकाम् अद्भुतां कलाकृतिं निर्मितवान्। सः प्रायः सार्धद्विकिलोग्रामभारयुक्ते हरितनारिकेले तीक्ष्णैः उपकरणैः प्रधानमन्त्रिणः नरेन्द्रमोदिनः चित्रं उत्कीर्णवान्। एतस्याः कलाकृतेः निर्माणे तेन त्रयः दिवसाः व्यतीताः। मधुरेन्द्रकुमारेण नारिकेले "OUR PM OUR PRIDE" इति लिखितम्। "जनसेवा से राष्ट्रसेवा" इति सन्देशमपि तेन प्रदत्तम्। एतां कलाकृतिं दृष्ट्वा जनाः आश्चर्यचकिताः अभवन्। सामान्यतः जनाः नारिकेलं केवलं पानार्थं भोजनार्थं वा प्रयुज्यन्ते इति मन्यन्ते, किन्तु मधुरेन्द्रकुमारेण तत् स्वकीयकलायाः माध्यमत्वेन प्रयुक्तम्।
हरितनारिकेलस्य गोलाकारस्य असमानस्य च पृष्ठभागे कस्यचित् मुखस्य सूक्ष्मविवरणानाम् उत्कीर्णनं अत्यन्तं कठिनं कार्यम् आसीत्। अल्पेनापि प्रमादेन सम्पूर्णं चित्रं विकृतं भवितुम् अर्हति स्म। तथापि मधुरेन्द्रकुमारेण धैर्यपूर्वकं सूक्ष्मतया च छेदनं कृत्वा एतत् कार्यं सफलतया सम्पन्नं कृतम्। मधुरेन्द्रकुमारस्य एषः प्रयोगः विशेषः अस्ति, यतः सः कलानिर्माणाय महद् मूल्यं किमपि चित्रफलकं वा विशेषं पृष्ठं न प्रयुक्तवान्। तेन प्राकृतिकवस्तुमेव स्वकीयकल्पनायाः माध्यमत्वेन प्रयुक्तम्। कलाकारस्य मधुरेन्द्रकुमारस्य मतानुसारं सः स्वकलया विभिन्नेषु अवसरेषु सामाजिकं राष्ट्रियं च सन्देशं जनानां समीपं प्रापयति। अस्मिन् समये तेन प्रधानमन्त्रिणः जन्मदिवसस्य स्मरणीयरीत्या आयोजनस्य प्रयासः कृतः। कलाकृतेः चित्राणि सार्वजनिकरूपेण प्रकाशे आगतानन्तरं जनानां दृष्टिः अपि अस्याम् अनुपमप्रयोगे केन्द्रिता अभवत्। सार्धद्विकिलोग्रामभारयुक्ते नारिकेले प्रधानमन्त्रिणः चित्रं द्रष्टुं जनानां कृते एषः अनुभवः प्रतिदिनं न लभ्यते। कलाकृतेः एकस्मिन् पार्श्वे प्रधानमन्त्रिणः चित्रम् अस्ति, अपरस्मिन् पार्श्वे "OUR PM OUR PRIDE" इति सन्देशः अस्ति। एतत् संयोजनं सामान्यशुभकामनासन्देशेभ्यः पृथक् अस्ति। पत्रात् नारिकेलपर्यन्तं प्रयोगानां कृते प्रसिद्धः मधुरेन्द्रकुमारः अस्ति। मधुरेन्द्रकुमारस्य कृते एषः प्रथमः अवसरः नास्ति, यदा सः पारम्परिकमार्गात् विचलितः भूत्वा अन्यं माध्यमं कलानिर्माणाय स्वीकृतवान्। २०२६ तमे वर्षे नवदिल्लीनगरे भारतमण्डपे आयोजितस्य अष्टादशस्य ब्रिक्सशिखरसम्मेलनस्य अवसरेऽपि तेन विशिष्टरीत्या कला प्रस्तुता।
तत्काले तेन पारम्परिकचित्रफलकस्थाने अन्यस्य प्राकृतिकवस्तुनः प्रयोगेन चित्रं निर्मितम्। प्रायः पञ्चदशदिनानां परिश्रमेण सिद्धायां तस्यां कलाकृतौ "WELCOME TO INDIA-BRICS 2026" इति सन्देशेन भारतस्य अतिथिसत्कारपरम्परायाः वैश्विकसहयोगस्य च भावः प्रदर्शितः आसीत्। अधुना पत्रस्य अनन्तरं नारिकेलस्य प्रयोगः कृतः। अर्थात् मधुरेन्द्रकुमारस्य कृते कलानिर्माणस्य माध्यमं किमपि भवितुम् अर्हति आवश्यकं केवलं कल्पनाशक्तिः कौशलं च। नारिकेले केवलं जलं नास्ति, कलापि अस्ति।मधुरेन्द्रकुमारस्य एतां कलाकृतिं एकेन वाक्येन वर्णयितुं चेत्- "नारिकेलं सार्धद्विकिलोग्रामभारयुक्तम् आसीत्, किन्तु तस्मिन् कलासन्देशश्च ततोऽपि महान् आसीत्।"
त्रिदिनानां परिश्रमः, तीक्ष्णोपकरणैः सूक्ष्मं छेदनकार्यं तथा अभिनवचिन्तनम् एतेषां समन्वयेन साधारणं हरितनारिकेलं प्रधानमन्त्रिणः जन्मदिने कलाकारस्य अद्भुतशुभकामनासन्देशयुक्तायां कलाकृतौ परिवर्तितम् अभवत्।

# मुजफ्फरपुर-मण्डले स्वच्छता-अभियानस्य शङ्खनादः

## अक्टोबर्-मासस्य द्वितीय-दिनाङ्कपर्यन्तं भविष्यन्त्यायोजनानि

## पञ्चसु प्रमुख-स्तम्भेषु

### प्रवर्तिष्यतेऽभियानम्; जनसहभागितायां कचरावशेष-पृथक्करणे च विशेषः बलः

**मुजफ्फरपुरम्। हिमसंस्कृतवार्ताः राघव नाथ झा**
'स्वच्छतायां सहभागिता, स्वच्छ-भारतम्-विकसित-भारतम्' इति सङ्कल्पेन सह मुजफ्फरपुर-मण्डले 'स्वच्छता एव सेवा-२०२६' इति राष्ट्रियाभियानस्य मण्डलाधिकारिणा (DM) कुमारगौरवेण उप-विकास-आयुक्तेन (DDC) निशान्तसिहारेण च दीप-प्रज्वालनेन गुरौ वासरे शुभारम्भः कृतः। १७ सितम्बर-तः २ अक्टोबर्-दिनाङ्कं यावत् प्रचलति अस्मिन् अभियाने ग्रामेषु नगरेषु च स्वच्छतां जनसहभागितया योजयितुं विविधाः कार्यक्रमाः आयोजयिष्यन्ते।
अस्मिन् अभियाने पञ्चसु प्रमुख-क्षेत्रेषु विशेषं लक्ष्यं निर्धारितम् अस्ति—

१. दुर्लभानां मलिनानां च स्थानानां स्वच्छ-सार्वजनिक-स्थलरूपेण रूपान्तरणम्
२. स्वच्छ-पाठशाला युवानश्च
३. सफाई-मित्र-सुरक्षा तत्सम्मानश्च
४. जनसहभागिता
५. 'अवशिष्टात् उपादेय-निर्माणम्' (कबाड़ से जुगाड़)

विद्यालयेषु प्रबोधन-समारम्भैः सह युवानः सामान्य-नागरिकाश्च स्वच्छता-क्रियाकलापैः संयोजयिष्यन्ते। अवशिष्ट-सामग्रीणां सर्जनात्मक-प्रयोगाय तथा च 'प्लास्टिक्'-पुनश्चक्रणाय (रीसाइक्लिङ्ग) विविधाः उपक्रमाः प्रदर्शनी-मेलाश्च आयोजयिष्यन्ते।
मण्डलाधिकारिणा 'ठोस-अपशिष्ट-प्रबन्धन-नियमावली, २०२६' (Solid Waste Management Rules, 2026) इत्यस्याः अनुपालने बलं दत्तम्। तेन कचरोत्पत्ति-स्थलेष्वेव आर्द्रापशिष्टस्य, शुष्कापशिष्टस्य, नैमित्तिक-शोधन-कचराणां (सैनिटरी), सङ्कटमयानाम् इतरेषां च अवशिष्टाणां निर्धारित-रीत्या पृथक्करणं समुचितं निस्तारणं च विधातुम् आदिश्यत। अधिकारिभ्यः इदम् अभियानं केवलं कालावधिं यावत् सीमितम् अकृत्वा शाश्वत-स्वच्छता-व्यवस्थाभिः जन-व्यवहार-परिवर्तनेन च सम्बद्धीकर्तुं निर्देशः प्रदत्तः। दशभ्यः दिव्यांग-लाभार्थिभ्यः त्रिचक्र-वाहनानि, द्वाभ्यां चैकैक-लक्ष-रूप्यकाणां सावधि-जमा-पत्राणि पञ्चभ्यः लाभान्वितेभ्यः सामाजिक-सुरक्षा-वृत्ति-स्वीकृति-पत्राणि समर्पितानि





# पञ्चाङ्गीयपरम्परा च खगोलीययथार्थश्च

## मकरसङ्क्रान्तिः, उत्तरायणं च संवत्सरनिर्धारणं च इत्येतयोः पुनर्विचारः

त्रिस्कन्धज्योतिर्विद् आचार्यः राजेशबेञ्जवालः दैवज्ञः, देहरादूनम्

भारतीयकालगणना पञ्चाङ्गपरम्परा च अत्यन्तप्राचीना वैज्ञानिक बहुस्तरीया च व्यवस्थायाम् आधृता वर्तते। अस्यां सूर्य- चन्द्र- नक्षत्र- ऋतु- अयन- मास- संवत्सरादीनाम् आधारेण कालस्य निर्धारणं क्रियते। धार्मिककृत्येषु प्रयुज्यमानात् सङ्कल्पात् आरभ्य पर्वनिर्णयपर्यन्तं पञ्चाङ्गस्य प्रत्येकस्य गणनायाः स्वकीयः विशिष्टः आधारः वर्तते। अत एव विविधाः कालगणनापद्धतयः स्वकीयप्रयोजनानुरूपेण अवगन्तव्याः।

वर्तमानसमये विशेषतः द्वयोः विषययोः पुनर्विचारस्य आवश्यकता दृश्यते- मकरसङ्क्रान्तेः उत्तरायणस्य च परस्परसम्बन्धः तथा धार्मिकसङ्कल्पे प्रयुज्यमानस्य संवत्सरस्य सम्यक् निर्धारणम्। उभयोः विषययोः एकः सामान्यः प्रश्नः अस्ति यत् पञ्चाङ्गे विविधाः गणनाः कस्मै प्रयोजनाय स्वीकर्तव्याः तथा तासां मध्ये स्पष्टः भेदः कथं स्थापनीयः।

### १. मकरसङ्क्रान्तिः उत्तरायणं च- द्वे पृथक् खगोलीये घटने।

मकरसङ्क्रान्तिः उत्तरायणं च प्रायः एकैव घटना इति मन्येते। भारतीयलोकजीवने मकरसङ्क्रान्तेः कृते 'उत्तरायणी' इत्यादीनां नाम्नाम् अपि व्यापकः प्रयोगः दृश्यते। किन्तु खगोलीयदृष्ट्या एतयोः परिभाषे समाने न स्तः। मकरसङ्क्रान्तिः सूर्यस्य निरयनराशिचक्रे मकरराशौ प्रवेशस्य घटना अस्ति। निरयनगणनानुसारं यदा सूर्यः २७० अंशान् प्राप्नोति, तदा मकरसङ्क्रान्तेः क्षणं निर्धारितं भवति। अतः अस्याः आधारः निरयनसूर्यस्य राशिसङ्क्रमणस्थितिः अस्ति। तद्विपरीतम् उत्तरायणस्य सम्बन्धः सूर्यस्य उत्तरगतेः आरम्भेन सह अस्ति। खगोलीयदृष्ट्या एतत् सूर्यस्य दक्षिणदिशायां वार्षिकस्य आभासीयस्य गमनस्य समाप्त्या उत्तरदिशायां गमनस्य च आरम्भेन सह सम्बद्धम् अस्ति। अस्य आधारः शीतकालीनः अयनान्तः अस्ति।

एवं तयोः घटनयोः गणितीयौ आधारौ पृथक् स्तः- एकस्मिन् पक्षे निरयनराशिसङ्क्रमणम्, अपरस्मिन् पक्षे अयनगतिपरिवर्तनम्।

**अयनांशकारणेन उत्पन्नः अन्तरः**

निरयनसायनगणनयोः अयनांशस्य कारणेन अन्तरम् उत्पद्यते। पृथिव्याः अक्षस्य दीर्घकालीनगतित्वात् विषुवद्विन्दूनां स्थितिः स्थिरा न भवति। फलतः सायननिरयनराशिचक्रयोः मध्यस्थोऽपि अन्तरः कालेन सह परिवर्तते।

ऐतिहासिककाले एतादृशाः समयाः आसन्, यदा मकरसङ्क्रान्तिः शीतकालीनश्च अयनान्तः प्रायः एकस्मिन्नेव समये अभवताम्। ऐतिहासिकस्य तस्य सामीप्यस्य प्रभावेन मकरसङ्क्रान्तेः उत्तरायणस्य च परस्परपर्यायरूपेण दर्शनस्य परम्परा प्रवर्धिता स्यात्। किन्तु वर्तमानगणनात्मकस्थितौ तयोः मध्ये प्रायः पञ्चविंशतिः षड्विंशतिश्च दिनानाम् अन्तरं दृश्यते।

अतः ऐतिहासिके कस्मिंश्चित् काले तयोः सामीप्यम् आसीत् इति कारणेन सर्वेषु कालेषु तयोः एकत्वं भवतीति न आवश्यकम्।

**पञ्चाङ्गे तयोः पृथक् प्रविष्टिः-**

अस्मिन् दृष्टिकोणे पञ्चाङ्गनिर्माणे मकरसङ्क्रान्तेः उत्तरायणस्य च पृथक् खगोलीयाधारस्य स्पष्टतया स्वीकरणम् उपयोगि भविष्यति।

**प्रस्तावितव्यवस्थानुसारम्-**

१. मकरसङ्क्रान्तेः क्षणः निरयनसूर्यस्य २७० अंशेषु प्रवेशेन निर्धारितः भवेत्।

२. उत्तरायणस्य खगोलीयः आरम्भः शीतकालीनादयनान्तात् निर्धारितः भवेत्।

३. यदि उभे घटने एकस्मिन्नेव नागरदिने घटेते, तर्हि पञ्चाङ्गे 'मकरसङ्क्रान्तिः उत्तरायणं च संयोगः' इति निर्दिष्टं भवेत्।

४. यदि उभे पृथक् पृथक् नागरदिने भवतः, तर्हि तयोः पृथक् प्रविष्टिः दीयेत।

५. पञ्चाङ्गे स्पष्टं क्रियतां यत् मकरसङ्क्रान्तिः निरयनराशिसङ्क्रमणम् अस्ति, उत्तरायणं तु अयनगतं खगोलीयं परिवर्तनम् अस्ति।

६. येषु प्रदेशेषु मकरसङ्क्रान्तिः 'उत्तरायणी' इति कथ्यते, तत्र तां लोकपरम्परां सांस्कृतिकरूपेण स्वीकृत्य पञ्चाङ्गीयटिप्पण्यां तयोः खगोलीयपृथक्तां स्पष्टतया प्रदर्शयितुं शक्यते।

अनेन धार्मिकसांस्कृतिकपरम्परायाः परित्यागस्य प्रश्न एव नोत्पद्यते, अपि तु तया सह खगोलीयघटनायाः अधिकं स्पष्टं निरूपणं सम्भवति।

### २. धार्मिकसङ्कल्पे कः संवत्सरः?

**चान्द्रसंवत्सरस्य बृहस्पत्यसंवत्सरस्य च भेदः**

भारतीयकालगणनायाः द्वितीयः महत्त्वपूर्णः विषयः संवत्सरनिर्धारणेन सम्बद्धः अस्ति। धार्मिककर्मणां सङ्कल्पं कुर्वता संवत्सरस्य संकीर्तनं क्रियते। परन्तु भारतीयपरम्परायां केवलम् एक एव प्रकारः संवत्सरः प्रचलितः नास्ति।

विविधप्रयोजनार्थं विविधाः संवत्सरपद्धतयः प्रचलिताः आसन्, यथा बृहस्पतिसंवत्सरः, चान्द्रसंवत्सरः, वेदाङ्गचन्द्रवत्सरः, अन्याः कालगणनात्मिकाः संवत्सरपद्धतयश्च। अतः अयं प्रश्नः महत्त्वपूर्णः भवति यत् धार्मिकसङ्कल्पे कस्य संवत्सरस्य ग्रहणं कर्तव्यम्?

**बृहस्पतिसंवत्सरस्य प्रयोजनम्**

बृहस्पतेः गत्याधारितस्य संवत्सरचक्रस्य स्वकीयम् विशिष्टं ज्योतिषीयं महत्त्वं वर्तते। वर्षप्रवेशे, कुण्डलीनिर्माणे तथा संवत्सरफलादिषु लौकिकेषु अथवा ज्योतिषीयेषु फलादेशपरम्परासु बृहस्पतिसंवत्सरस्य उपयोगः क्रियते।

अतः पञ्चाङ्गे बृहस्पतिसंवत्सरस्य निर्देशः स्वयमेव अनुचितः नास्ति। समस्या तदा उत्पद्यते यदा ज्योतिषीयसंवत्सरः धार्मिकसङ्कल्पे अपेक्षितेन संवत्सरेण सह अभिन्नः मन्यते।

**सङ्कल्पे चान्द्रसंवत्सरस्य प्रश्नः**

धार्मिककर्मकाण्डपरम्परायां चान्द्रमासस्य, पक्षस्य, तिथेः च विशेषं महत्त्वं वर्तते। अस्यैव क्रमस्य अनुसारेण सङ्कल्पे प्रयुज्यमानस्य संवत्सरस्य विषयेऽपि चान्द्रसंवत्सरस्य ग्रहणस्य परम्परायाः उल्लेखः प्राप्यते।

**प्रचलितं वचनम्-** स्मर्तुः सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा।

इत्यस्य आशयः एवं स्वीक्रियते यत् स्मार्तकर्मणाम् आरम्भे सङ्कल्पादिषु चान्द्रसंवत्सरस्य ग्रहणं करणीयम्। अनेन आधारेण धार्मिकसङ्कल्पस्य ज्योतिषीयसंवत्सरफलस्य च उभयोः प्रयोजनं पृथक् स्थापयितुम् आवश्यकं भवति।

**पञ्चाङ्गे अपेक्षितं सुधारम्-**

यदि पञ्चाङ्गस्य प्रयोजनं केवलं सामान्यवर्षसूचनां दातुम् न भवति, अपि तु श्रौतस्मार्तकर्मणां कृते व्यवहारोपयोगिनः मार्गदर्शनस्य प्रदानमपि भवति, तर्हि तस्मिन् सङ्कल्पार्थम् आवश्यकः संवत्सरसूचनास्पष्टतया उपलब्धा भवितुमर्हति।

अस्मिन् दृष्टिकोणे पञ्चाङ्गे निम्नलिखिता व्यवस्था उपयोगिनी भवेत्-

१. बृहस्पतिसंवत्सरः वर्षप्रवेशाय, संवत्सरफलादिज्योतिषीयप्रयोजनाय च पृथक्तया निर्दिश्येत।

२. चान्द्रसंवत्सरः श्रौतस्मार्तकर्मणां सङ्कल्पाय स्पष्टतया प्रदर्श्येत।

३. वेदाङ्गचन्द्रवत्सरस्यापि यत्र आवश्यकता भवति, तत्र पृथग् उल्लेखः क्रियेत।

४. पञ्चाङ्गस्य प्रारम्भे स्पष्टं निर्दिश्येत यत् कः संवत्सरः कस्मै प्रयोजनाय ग्राह्यः।

अनेन सङ्कल्पकर्तुः, आचार्यस्य, पुरोहितस्य च पृथक्पृथक् गणनानां मध्ये भ्रमः न भविष्यति।

**परम्परायाः गणितस्य च मध्ये समन्वयः**

एतौ उभौ विषयौ सम्यग् अवलोक्य एकः महत्त्वपूर्णः विषयः प्रकाशते- भारतीयपञ्चाङ्गपरम्परायां बह्व्यः कालगणनापद्धतयः एककालमेव प्रचलिताः सन्ति, किन्तु प्रत्येकस्याः पद्धतेः स्वकीयः प्रयोजनविशेषः वर्तते।

मकरसङ्क्रान्तेः आधारः निरयनसूर्यस्य मकरराशौ प्रवेशः अस्ति, उत्तरायणस्य तु आधारः सूर्यस्य अयनगतिपरिवर्तनम्। तथैव बृहस्पतिसंवत्सरस्य उपयोगः संवत्सरफलादिषु ज्योतिषीयप्रयोजनेषु भवितुमर्हति, धार्मिकसङ्कल्पे तु चान्द्रसंवत्सरस्य परम्परायाः पृथग् विचारः अपेक्षितः।

अतः आवश्यकता कस्याश्चित् एकस्याः परम्परायाः अन्यया परम्परया प्रतिस्थापनस्य नास्ति, अपि तु प्रत्येकस्याः गणनायाः शास्त्रीयं, गणितीयं,



# पटना-विश्वविद्यालयस्य केन्द्रीय-पुस्तकालयः अधुना रात्रौ दश-वादनपर्यन्तम् उद्घाटितः भविष्यति; विद्यार्थिनः प्राप्स्यन्ति होरा-द्वयस्य अतिरिक्तं समयम्

अहोरात्रं (२४ होराः) पुस्तकालय-सञ्चालनस्य याचनां कृत्वा छात्रैः कृतम् आसीद् आन्दोलनम्; राजभवनादेशानन्तरं समय-विस्तारस्य सज्जता

**पाटलीपुत्रम्। हिमसंस्कृतवार्ताःराघव नाथ झा**

पटना-विश्वविद्यालयस्य (Patna University) विद्यार्थिभ्यः केन्द्रीय-पुस्तकालयं समधिकृत्य महती वार्ता सम्मुखम् आगता अस्ति। अधुना विश्वविद्यालयस्य केन्द्रीय-पुस्तकालयः प्रातः अष्ट-वादनात् आरभ्य रात्रौ दश-वादनं यावत् (८:०० तः २२:००) उद्घाटयितुं प्रक्रमः प्रचलति। साम्प्रतिक-समये पुस्तकालयस्य सञ्चालनं प्रातः अष्ट-वादनात् रात्रौ अष्ट-वादनपर्यन्तम् (८:०० तः २०:००) एव भवति। अस्याः नूतन-व्यवस्थायाः प्रवर्तनानन्तरं विद्यार्थिनः प्रतिदिनम् अध्ययनाय होरा-द्वयस्य (२ घण्टानाम्) अतिरिक्तम् अवकाशं प्राप्स्यन्ति।

## राजभवनात् सम्प्राप्तः निदेशः

पुस्तकालयस्य कार्यावधिं वर्धयितुं राजभवनेन पटना-विश्वविद्यालयाय पत्रं प्रेषितम्। तस्मिन् पत्रे केन्द्रीय-ग्रन्थालयः द्वादश-होराणाम् (१२ घण्टानाम्) स्थाने चतुर्दश-होराः (१४ घण्टाः) यावत् सञ्चालनीयः इति स्पष्टादेशः दत्तः। पत्र-सम्प्राप्तेः अनन्तरं विश्वविद्यालय-प्रशासनेन नूतन-व्यवस्थायाः क्रियान्वयनाय प्रक्रिया प्रारब्धा। विश्वविद्यालयस्य छात्र-कल्याण-सङ्कायाध्यक्षेण (DSW) प्राध्यापक-कामेश्वरपण्डित-महोदयेनापि राजभवनात् एतत्सम्बन्धि-पत्रस्य सम्प्राप्तिः दृढतया संपुष्टा। तथापि, साम्प्रतं नूतन-व्यवस्थायाः अन्तिम-सञ्चालन-तिथिः नैव निश्चिता। अस्य प्रधानं कारणं ग्रन्थालये कर्मचारिणाम् अभावः इति संसूचितम्। अतिरिक्त-समयस्य सुचारु-सञ्चालनाय पुस्तकालय-निदेशकेन विश्वविद्यालय-प्रशासनात् अतिरिक्त-कर्मिणां याचना कृता अस्ति।

अहोरात्रं (२४ होराः) पुस्तकालय-प्रवर्तनाय सञ्जातं महद् आन्दोलनम्पटना-विश्वविद्यालयस्य केन्द्रीय-पुस्तकालयं सम्पूर्णम् अहोरात्रं (२४ घण्टाः) यावत् उद्घाटयितुं विद्यार्थिभिः महद् आन्दोलनं कृतम् आसीत्। 'एआइएसएफ' (AISF)-सङ्घटनासम्बद्धैः छात्रैः एतां याचनां समाश्रित्य सप्ताहं यावत् अनशनं (क्षुत्-हड़ताल) विहितम्। तदनन्तरं छात्र-प्रतिनिधि-मण्डलं विचार-विमर्शार्थं राजभवने समाहूतम्।



# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
क्युरियोसिटि-नाम्ना अन्तरिक्षयानेन मङ्गलग्रहे कानिचन विचित्राणि पदानि दृष्टानि। तानि अतीव रहस्यमयानि इति वैज्ञानिकैः चिन्तितम्।
**काव्या-** नमस्ते नन्दिनि। मङ्गल-ग्रहस्य वार्ता अतीव आश्चर्यकरी। इदानीं द्वितीया वार्ता श्रूयताम्। वैज्ञानिकैः मूषकस्य मस्तिष्कात् चलच्चित्रं रचितम्।
मूषकेण यत् दृष्टं, तत् सर्वं सङ्गणकेन चित्रपटले यथावत् पुनः प्रदर्शितम्।
**नन्दिनी-** अहो! मस्तिष्कस्य चलच्चित्रं तु महती उपलब्धिः एव।
बिहार-राज्ये जनैः गुझिया-मिष्टान्नस्य अधिकाराय एका प्राचीना मूर्तिः प्रदर्शिता। तस्यां मूर्तौ भगवता हस्ते मिष्टान्नं धृतम्।
काव्या- मिष्टान्नस्य कृते नवशतवर्षप्राचीना मूर्तिः प्रयुक्ता इति अद्भुतम्।
पञ्जाबराज्ये एकं विद्युद्-यानं चालकेन विना सहसा स्वयम् एव चलितम्। चालकेन विना एव अन्ते तेन भ्रमता यानेन एकः वृक्षः घट्टितः। तत् दृष्ट्वा मार्गे सर्वे जनाः भीताः।

**हिमसंस्कृतवार्ताः, ईदरधीररजः**



# हास्यकणिका

-विदुषी

**पत्नी-** (वेफ़र-चिप्स दत्त्वा) एतानि खादिष्यसि?
**पतिः-** न, मम मनः नास्ति। अहं न खादिष्यामि।
**पत्नी-** आम्, त्वं तु मम मस्तिष्कमेव खादिष्यसि!
**पतिः** 😖 😖
पतिः- (क्रुद्धः सन्, हस्ते शीतपेयपात्रं गृहीत्वा) पास्यसि किम्?
**पत्नी-** न, मम पानस्य इच्छा नास्ति।
**पतिः-** आम्, त्वं कथं पास्यसि? त्वं तु मम रक्तमेव पास्यसि!
**पत्नी** 😡 😡 😡 😡 😡 😡

व्यवहारिकं च प्रयोजनमनुसृत्य तस्याः स्पष्टनिर्धारणस्य अस्ति। पञ्चाङ्गं केवलं तिथीनां पर्वणां च सूची नास्ति। तत् भारतीयकालबोधस्य, ज्योतिषीयगणितस्य, धार्मिकाचारव्यवस्थायाश्च मध्ये सेतुरूपेण कार्यं करोति। अतः तस्मिन् प्रयुज्यमानस्य प्रत्येकस्य गणनापद्धतेः आधारः प्रयोजनं च स्पष्टं करणीयम्। मकरसङ्क्रान्तेः उत्तरायणस्य च तयोः पृथक्खगोलीयाधारानुसारम् अङ्कनं तथा धार्मिकसङ्कल्पाय चान्द्रसंवत्सरस्य आवश्यकतानुसारं वेदाङ्गचन्द्रवत्सरस्य च स्पष्टतया उपलब्धीकरणं कृत्वा पञ्चाङ्गीयगणना अधिका पारदर्शिनी, वैज्ञानिकतरा, कर्मकाण्डीयव्यवहाराय च अधिकोपयोगिनी भवितुमर्हति।
अस्मिन् विषये शास्त्राणां, सिद्धान्तज्योतिषः, गणितज्योतिषः, ऐतिहासिकपञ्चाङ्गानां, आधुनिक-खगोलीयगणनानां तुलनात्मकाध्ययनम् आधारीकृत्य व्यापकस्य विद्वद्विमर्शस्य आवश्यकता वर्तते। एष एव विमर्शः भारतीयपञ्चाङ्गपरम्परायां परम्परायाः आधुनिकखगोलीयगणितस्य च मध्ये अधिकं स्पष्टं सुसङ्गतं च समन्वयं साधयितुं मार्गं प्रशस्तीकरिष्यति।



# "संस्कृतकथामञ्जरी" {१९} ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्। "अथ ब्रह्मराक्षसोद्धारो नाम त्रयोदशोपाख्यानम्" (२)

तस्मिन्नवसरे अतिभयङ्कररूपः कश्चित् ब्रह्मराक्षसः राजसमीपमागतः। राजाऽपि तं दृष्ट्वा अवदत्- भो महासत्त्व! कोऽसि त्वम्? तेनोक्तम्- अहमेतन्नगरवासी कश्चित् ब्राह्मणः सर्वदा ब्रह्मस्वापहारी दुष्प्रतिग्रहजीवी अयाज्ययाजश्च आसम्। तथाविधश्च गुरून्, वृद्धान्, साधून, महतश्च अदूषयम्। तस्मात् पातकवशात् अस्मिन् अश्वत्थपादपे ब्रह्मराक्षसो भूत्वा अत्यन्तदुःखितो दशवर्षसहस्रं तिष्ठामि। भवान् परोपकारी सुकृतचरितः, तवानुग्रहेण अहं पातकान्मुक्तो भविष्यामि इति विश्वस्य त्वां शरण्यम् आश्रयामि इति। तद्वाक्यं श्रुत्वा राज्ञा तदैव ब्राह्मणादधिगतं तत् पुण्यं तस्मै दत्तम्। सोऽपि तेन पुण्येन तस्मात् जन्मनो मुक्तो दिव्यरूपधरः सन् राजानं स्तुत्वा स्वर्गं जगाम; राजाऽपि स्वनगरमगमत्। इति कथां कथयित्वा पुत्तलिका भोजमवदत्- त्वय्येवं चेत् परोपकारो धैर्यमौदार्य्यश्च विद्यते, तर्ह्यस्मिन् सिंहासने समुपविश। राजाऽप्यधोमुखो बभूव।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**